"आवशीरांश्च योधांश्च अहिच्छत्रं च योधयन् । पूर्व्वां दिशं विनिर्जित्य वत्सभूमिं तथाऽगमत्" ।

**अहिगण** पु० १छन्दःशास्त्रप्रसिद्धे पञ्चमात्रात्मके आद्यगुरुके अन्त्यलघुत्रयरूपे सप्तमभेदे । ६त० । २सर्पाणां समूहे ।

**अहिच्छत्र** पु० अहेः फणाकारः छत्रमच्छादकः । १मेषशृङ्गीवृक्षे, २नगरीभेदे स्त्री । ३देशभेदे पु० । स च देशः पार्थेन निर्ज्जित्य द्रोणाय दत्तः । "अहिच्छत्रं च विषयं द्रोणः समभिपद्यत । एवं राजन्नहिच्छत्रा पुरीजनपदायुता युधि निर्ज्जित्य पार्थेन द्रोणाय प्रतिपादिता" भा०आ०प० १३८ अ० । तत्र द्रुपदराज्यं पूर्व्वमासीत् यथोक्तं हरिवंशे २०अ० "अहिच्छत्रं स्वकं राज्यं पित्र्यं प्राप महाद्युतिः । द्रुपदस्य पिता राजन् ! समैवानुमते तदा। ततोऽभूद्द्रुपदोराजा द्रोणस्तेन निराकृतः । ततोऽर्ज्जुनेन तरसा निर्ज्जित्य द्रुपदं रणे । अहिच्छत्रं सकाम्पिल्यं द्रोणायाथापवर्ज्जितम् । प्रतिगृह्य ततोद्रोणः उभयं जयतांवरः । काम्पिल्लं द्रुपदायैव प्रायच्छद्विदितं तव" हरि०२०अ० तत्सीमाबन्धश्च भा० आ० प० १३७अ० उक्तः । "कामन्दीमथ गङ्गायास्तीरे जनपदायुताम् । सोऽध्यवात्सीद्दीनमनाः काम्पिल्लञ्च पुरोत्तमम्" । दक्षिणांश्चापि पञ्चालान् यावच्चर्म्मखतीं नदीम् । द्रोणेन चैवं द्रुपदं परिभूयाथ पालिता" । अहिच्छत्रस्य नामान्तरं प्रत्ययः हेम०। अहिच्छत्रे भवः अण् आहिच्छत्रः । स्त्रियां ङीप् गुरूपोत्तमत्वेऽपि गोत्रार्थभिन्नत्वात् न ष्यङ् आहिच्छत्री" सि०कौ० ।

**अहिजित्** पु० अहिं सर्पं वृत्रासुरं वा जितवान् जि-क्विप् तुक् च । १कृष्णे, २इन्द्रे च । तत्र कृष्णस्य कालियदमनात्तथात्वम् तत्कथा हरि०६८अ०। "कृष्ण कृष्ण ! महाबाहो ! गोपानां नन्दिवर्द्धन ! । दृश्यतामेष वै क्षिप्रं सर्पराजो विषायुधः । इमे नो बान्धवास्तात ! त्वां मत्वा मानुषं विभो ! । परिदेवन्ति करुणं सर्वे मानुषबुद्धयः । तच्छ्रुत्वा रौहिणेयस्य वाक्यं संज्ञासमीरितम् । विक्रीड्याऽस्फोटयन् बाहू भित्त्वा तं भोगबन्धनम् । तस्य पद्भ्यां समाक्रम्य भोगराशिं जलोत्थितम् । शिरस्तु कृष्णो जग्राह स्वहस्तेनावनाम्य च । तस्यारुरोह सहसा मध्यमं तन्महच्छिरः। सोऽस्य मूर्द्धि स्थितः कृष्णः ननर्त्त रुचिराङ्गदः । मृद्यमानः स कृष्णेन श्रान्तमूर्द्धा भुजङ्गमः" । इति । इन्द्रस्य वृत्रासुरजयकथा भाग० ६स्कन्धे ८अ० "अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा । मुनेः शक्तिभिरुत्सिक्तं भगवत्तेजसान्वितम्" इत्युपक्रम्य इन्द्रवृत्रासुरयुद्धं वर्णयित्वा "भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः उच्चकर्त्त शिरः शत्रोर्गिरिशृङ्गमिवोजसा" इत्युक्तम् । [ जिह्वाख्यलतायाम् ।

**अहिजिह्वा** स्त्री अहेर्जिह्वेव तदाकारशिखत्वात् । नाग-

**अहिण्डुका** स्त्री हिण्ड-उकञ् न०त० । सुश्रुतोक्ते कीटभेदे कीटशब्दे विवृतिः "अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवोमोहश्च" । "अहिण्डुकाभिदष्टानामापदोविषनाशनम्" इति च सुश्रुतः ।

**अहित** पु० न०त० । १शत्रौ । २पथ्यभिन्ने त्रि० । सुश्रुतोक्तानि अहितानि अपथ्यशब्दे २२६ पृष्ठे उक्तानि "अहितानिलोद्धूतैस्तर्जयन्निव केतुभिः" रघुः "रामनाम इति तुल्यमात्मजे वर्त्तमानमहिते च दारुणे" रघुः "निन्दन्तस्तव सामर्थ्यं वदिष्यन्ति तवाहिताः" गीता । चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् । अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत" मनुः । "अहितो देहजोव्याधिर्हितमारण्यमौषधम्" ।

**अ(आ)हितुण्डिक** पु० अहेस्तुण्डं मुखं तेन दीव्यति ठन् ठञ् वा । १व्यालग्राहिणि, २सर्पखेलके च ।

**अहिद्विष्** पु० अहिं सर्पं वृत्रासुरं वा द्विष्टवान् द्विष-भूते क्विप् । १गरुडे, २मयूरे, ३नकुले, ४इन्द्रे गरुडमयूरनकुलानां स्वभावसिद्धं तथात्वम् इन्द्रस्य वृत्रासुरहेतृत्वमहिजिच्छब्दे उक्तम् "अहिद्विषस्तद्भवता निशम्यताम्" माघः। क । अहिद्विषोऽप्युक्तार्थेषु। [स्वभावसिद्धे वैरे ।

**अहिनकुलिका** स्त्री अहिनकुलयोर्वैरम् वुन् । सर्पनकुलयोः

**अहिनिर्म्मोक** पु० अहिना निर्मुच्यते निर्+मुच-कर्म्मणि घञ् ६त० । सर्पकञ्चुके (खोलस) इति ख्याते ।

**अहिनिर्लयणी** स्त्री अहिर्निर्लीयतेऽस्याम् निर्+ली-ल्युट् ङीप् । (खोलस) इति ख्याते सर्पनिर्म्मोके । "तद्यथाऽहिनिर्लयणी वल्मीके मृता प्रत्यस्ता शेते" छ०उ० ।

**अहिपताक** पु० अहिषु पताका तदाकारोऽस्त्यस्य अच् । सर्पभेदे अहिशब्दे ५८१ पृष्ठे सुश्रुतोक्तस्तद्भेदोदृश्यः ।

**अहिपति** पु० ६त० । वासुकिनागे । अहिनाथादयोऽप्यत्र ।

**अहिपुत्रक** पु० अहेः पुत्रः इव कायति प्रकाशते कै-क । सर्पाकारे नौकाविशेषे (छिप्) ।

**अहिपूतन** न०सुश्रुतोक्ते क्षुद्ररोगभेदे यथा "समासेन चतुश्चत्वारिंशत् क्षुद्ररोगा भवन्ति" इत्युपक्रम्य "निरुद्धगुदोऽहिपूतनं वृषणकच्छूर्गुदभ्रंशश्चेति" तान् गणयित्वा" "शकृन्मूत्र-